# Bhadramatikritam Hari Stotram

# भद्रमतिकृतं हरिस्तोत्रम्

## Document Information

Text title : Bhadramatikritam Hari Stotram

File name : bhadramatikRRitaMharistotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 403/60-67||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# भद्रमतिकृतं हरिस्तोत्रम्

ततो ययौ परं तीर्थं पापनाशननामकम् ।
स्नात्वा ददौ श्रोत्रियाय भूदानं वैष्णवाय सः ॥ ६० ॥

तत्कालं भगवाँस्तत्र साक्षादाविर्बभूव ह ।
भद्रमतिः स्तवं चक्रे नमो नारायणाय ते ॥ ६१ ॥

कारणाय प्रपालायाऽन्तकाय नायकाय च ।
पावकाय प्रसन्नाय स्मृद्धिदाय च ते नमः ॥ ६२ ॥

श्रीशाय श्रीकृष्णनारायणाय भूधराय च ।
लक्ष्मीशाय प्रभेशाय माणिकीशाय ते नमः ॥ ६३ ॥

पार्वतीशाय गोपालबालकाय च ते नमः ।
कम्भराङ्कप्रजाताय सर्वज्ञाय च ते नमः ॥ ६४ ॥

चक्रपद्मादिचिह्नाय पुमुत्तमाय ते नमः ।
क्षीरसागरवासाय श्रीलक्ष्मीसेविताय च ॥ ६५ ॥

अभीष्टसुखदात्रे ते यज्ञवाराहरूपिणे ।
नमस्ते कमलाकान्त पद्माकान्ताय ते नमः ॥ ६६ ॥

पद्मिनीपतये भक्तदारिद्र्यनाशकाय ते ।
साधुरूपाय ते कृष्ण! भूयो भूयो नमो नमः ॥ ६७ ॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ४०३-अध्यायान्तर्गतं भद्रमतिकृतं हरिस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १ । अध्याय ४०३/६०-६७ ॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 403/60-67..

Proofread by PSA Easwaran

*Bhadramatikritam Hari Stotram*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*